श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्त महा देसिकाय नमः

Please install **Sanskrit New font** to view this file in sanskrit script.

## श्रीमद् वेदान्त देशिक मङ्गलाशासनम्

श्रीमान् वेङ्कट नाथार्यः कवितार्किक केसरी ।
वेदान्ताचार्य वर्यो मे सन्निधत्तां सदा हृदि ॥

श्रीमल्लक्ष्मण योगीन्द्र सिध्दान्त विजयध्वजम् ।
विश्वामित्र कुलोद्भूतं वरदार्यमहं भजे ॥

सर्वतन्त्र स्वतन्त्राय सिंहाय कविवादिनाम् ।
वेदान्ताचार्य वर्याय वेङ्कटेशाय मङ्गलम् ॥१

नभस्यमासि श्रोणाया मवतीर्णाय सूरये ।
विश्वामित्रान् वयायास्तु वेङ्कटेशाय मङ्गलम् ॥२

पिता यस्यान् अनन्तसूरिः पुण्डरीकाक्ष यज्वनः ।
पौत्रो यस्तनयस् तोतारम्बायास् तस्य मङ्गलम् ॥३

वेङ्कटेशावतारोऽयं तद्घण्टांशोऽथवा भवेत् ।
यतीन्द्रांशो थवेत्येवं वितर्क्यायास्तु मङ्गलम् ॥४

श्री भाष्यकारः पन्थानम् आत्मना दर्शितं पुनः ।
उद्धर्तु मागतो नूनमित्युक्तायास्तु मङ्गलम् ॥५

यो बाल्ये वरदार्यस्य प्राचार्यस्य परां दयाम् ।



rmvenkat@yahoo.com

अवाप्य वृध्दिं गमितः तस्मै योग्याय मङ्गलम् ॥६

रामानुजार्याद् आत्रेयान् मातुलात् सकलाः कलाः।
अवाप विंशत्यब्दे यस्तस्मै प्राज्ञाय मङ्गलम् ॥७

श्रुतप्रकाशिका भूमौ येनादौ परिरक्षिता।
प्रवर्त्तिता च पात्रेषु तस्मै श्रेष्टाय मङ्गलम् ॥८

सांस्कृतीभिर् द्रामिडीभिः बह्वीभिः कृतिभिर्जनान्
यस्स मुज्जीवयामास तस्मै सेव्याय मङ्गलम् ॥९

यः ख्याति लाभ पूजासु विमुखो वैष्णवे जने।
कृयणीय दशां प्राप्तः तस्मै भव्याय मङ्गलम् ॥१०

यस्मादेव मया सर्वं शास्त्र मग्राहि नान्यतः।
तस्मै वेङ्कटनाथाय मम नाथाय मङ्गलम् ॥११

पित्रे ब्रह्मोपदेष्ट्रे मे गुरवे दैवताय च।
प्राप्याय प्रापकायास्तु वेङ्कटेशाय मङ्गलम् ॥१२

यः कृतं वरदार्येण वेदान्ताचार्य मङ्गलम्।
आशास्ते अनुदिनं सोऽपि भवेन मङ्गल भाजनम् ॥१३

भाद्रपद मासगत विष्णु विमलर्क्षे
वेङ्कट महीद्रपति तीर्थ दिनभूते।
प्रादुर भवज्जगति दैत्य रिपुघण्टा
हन्त कवितार्किक मृगेन्द्र गुरुमूर्त्या ॥

सशङ्ख चक्रलाञ्छनः सदूर्ध्व पुण्ड्र मण्डितः
सकण्ठ ल सत्तुलस्य नर्घ पध्म मालिकः।



rmvenkat@yahoo.com

सितान्तरिय सूत्तरीय यग्ज सूत्र शोभितः
ममाविरस्तु मानसे गुरुः स वेङ्कटेश्वरः॥

अनन्त सूरि सूनवे अभिनन्ध्यमान वैभवाद्
दिगन्त वादिहंस जैत्र कालमेघ देशिकात्।
उपात्त सर्व शासनाय हन्त वर्ष विंशतौ
पुनः पुनर्नमस्क्रियाऽस्तु वेङ्कटेश सूरये॥

गुरौ वादिहंसां बुदाचार्य शिष्ये
जना भक्ति हीना यतीन्द्राप्रिया स्युः।
यतीन्द्राप्रिया विष्णु कारुण्य दूराः
कुतो मुक्तिवार्ता हि ताधृग्विधानाम्॥

कवितार्किक कलभव्रज कबलीकृत सिंहं
कमलापति करुणारस परिवर्धित बोधम्।
यतिनायक पदपङ्कज युगली परतन्त्रं
भज मानस बुध वेङ्कटपति देशिकमनिशम्॥

वेदे सञ्जात खेदे मुनिजन वचने प्राप्त नित्या वमाने
संकीर्णे सर्व वर्णे सति तदनु गुणे निष्प्रमाणे पुराणे।
मायावादे समोदे कलिकलुष वशाच् छून्य वादेऽविवादे
धर्मत्राणाय योऽभूत् स जयति भगवान् विष्णु घण्टावतारः॥

कवितार्किक सिंहाय कल्याण गुण शालिने।
श्रीमते वेङ्कटेशाय वेदान्त गुरवे नमः॥

वादिध्विपशिरो भङ्ग पञ्चानन पराक्रमः।
श्रीमान् वेङ्कट नाथार्यः चिरं विजयतां भुवि॥

Please send your comments and suggestions to R.Venkat



rmvenkat@yahoo.com